पूजयित्वा सुरांस्तत्र वलिं दद्यात् समन्वितः ।
पुनर्द्दिनानि होतव्यं चत्वारि राजसत्तम ! ॥
चतुर्थीकर्म्म कर्त्तव्यं देयं तत्रापि शक्तितः ।
कृत्वा तु यज्ञपात्राणि यज्ञोपकरणानि च ॥
ऋत्विग्भ्यस्तु समं दद्यात् मण्डपं विभजेत् पुनः ।
होमपात्रञ्च शय्याञ्च आचार्य्याय निवेदयेत् ॥
ततः सहस्रं विप्राणामथवाष्टशतं तथा ।
भोजयेच्च यथाशक्त्या पञ्चाशद्वाथ विंशतिः ॥
एवमेव पुराणेषु तड़ागविधिरुच्यते ।
कूपवापीषु सर्व्वासु तथा पुष्करिणीषु च ॥
एष एव विधिर्द्दिष्टः प्रतिष्ठासु तथैव च ।
मन्त्रतस्तु विशेषः स्यात् प्रासादोद्यानभूमिषु ॥
अयन्तु ऋत्विगाचार्य्यविधिदृष्टेन कर्म्मणा ।
अल्पेष्वेकाग्निवत् कार्य्यं वित्तशाठ्यादृते नृणाम् ॥"
तड़ागे कालविशेषे जलस्थितेः फलं यथा,—
"प्रावृट्काले स्थितं तोयमग्निष्टोमसमं स्मृतम् ।
शरत्काले स्थितं तोयं यदुक्तफलदायकम् ॥
वाजपेयफलसमं हेमन्तशिशिरस्थितम् ।
अश्वमेधसमं प्राहुर्व्वसन्तसमयस्थितम् ॥
ग्रीष्मेऽपि तु स्थितं तोयं राजसूयफलाधिकम् ॥"
तड़ागकरणे फलं यथा,—

"एतान्महाराज ! विशेषधर्म्मान्
करोति योऽथ्यांन्त्वथ शुद्धबुद्धिः ।
स याति ब्रह्मालयमेककल्पं
दिवं पुनर्याति तथैव दिव्यम् ॥"

इति पाद्मे सृष्टिखण्डम् ॥

तड़ाघातः, पुं, (तटे आघातः । पृषोदरात् टस्य ड़त्वम् ।) ऊर्द्धीकृत्य हस्तिमुखाघातः । यथा, "उच्चैःकरिकराक्षेपे तड़ाघातं विदुर्ब्बुधाः ॥"
इति कुमारसम्भवटीका ॥

तड़ित्, स्त्री, (ताड़यत्यभ्रमिति । तड़ आघाते + "ताड़ेर्णिलुक् च ।" उणां । १ । १०० । इति इतिप्रत्ययः णेर्लुक् च ।) विद्युत् । इत्यमरः ।१।३। ६ ॥ (यथा, रघुः । ६ । ५४ ।

"अथ नभस्य इव त्रिदशायुधं
कनकपिङ्गतड़िद्गुणसंयुतम् ।
धनुरधिज्यमनाधिरुपाददे
नरवरो रवरोषितकेशरी ॥")

तड़िल्वान्, [त्] पुं, (तड़ित् विद्युदस्यस्येति । तड़ित् + मतुप् । मस्य वः ।) मेघः । मुस्तकम् । इत्यमरः । १ । ३ । ७,२ । ४ । १५६ ॥ (विद्युद्-विशिष्टे, त्रि । यथा,—

"समुदितश्चिचयेन तड़िल्वतीं
लघयता शरदम्बुदसंहतिम् ॥"

इति किरातार्ज्जुनीये । ५ । ४ ॥)

तण्डकः पुं, (तण्डते नृत्यतीति । तण्ड + ण्वुल् ।) खञ्जनपक्षी । फेनः । समासप्रायवाक् । गृहदारु । तरुस्कन्धः । मायाबहुलके, त्रि । इति मेदिनी । के, ९८ ॥

तण्डकः, पुं क्ली, (तण्ड + ण्वुल् ।) परिष्कारः । इति लिङ्गादिसंग्रहे अमरः ॥

तण्डुः, पुं, शिवद्वारपालविशेषः । इति हलायुधः ॥

तण्डुरीणः, पुं, कीटमात्रम् । (तण्डुले भवः । तण्डुल + खः । लस्य रः ।) तण्डुलोदकम् । वर्व्वरे, त्रि । इति मेदिनी । णे, ६५ ॥

तण्डुलः, पुं, (तण्ड्यते आहन्यते इति । तड़ आघाते + "सानसिवर्णसीति ।" उणां ४ । १०७ । इति उलच् । यद्वा, "तम्लुटितनितड़िभ्य उलन् तण्डश्च ।" उणां ।५।६। इतिउलन् तण्डादेशश्च ।) विड़ङ्गम् । इति मेदिनी । ले, ६६ ॥ ("पुंसि क्लीवे विडङ्गः स्यात् कृमिघ्नो जन्तुनाशनः । तण्डुलश्च तथा वेल्लममोघा चित्रतण्डुला ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) तण्डुलीयशाकम् । इति शब्दरत्नावली ॥ धान्यादिनिकरः । इति मेदिनी । ले, ६६ ॥ चाउल इति भाषा । (यथा, पञ्चतन्त्रे । ३।५५।

'सङ्गतिः श्रेयसी पुंसां स्वपक्षे च विशेषतः ।
तुषैरपि परिभ्रष्टा न प्ररोहन्ति तण्डुलाः ॥
सुदुर्ज्जरः स्वादुरसो बृंहणस्तण्डुलो नवः ।
सन्धानकृच्छ्लेष्महरः पुराणस्तण्डुलः स्मृतः ॥
द्रव्यसंयोगसंस्कारविकारान् समवेक्ष्य तु ।
यदाकारणमासाद्य भोक्तृणां छन्दतोऽपि वा ॥
अनेकद्रव्ययोनित्वाच्छास्त्रतस्तान् विनिर्द्दिशेत् ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

भृष्टतण्डुलगुणाः । सुगन्धित्वम् । कफनाशित्वम् । रूक्षत्वम् । पित्तकारित्वञ्च । इति राजवल्लभः ॥

तण्डुलपरीक्षा, स्त्री, (तण्डुलेन परीक्षा ।) नवविधदिव्यान्तर्गतदिव्यविशेषः । चालपड़ा इति भाषा । तद्विधानं यथाह पितामहः ।

"चौर्य्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः ।
तण्डुलान् कारयेच्छुक्लाञ्छालेर्न्नान्यस्य कस्य चित् ॥
मृण्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ।
स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् ॥
प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकम् ।
तण्डुलान् भक्षयित्वा तु पत्रे निष्ठीवयेत्त्रिधा ॥
भूर्ज्जस्यैव तु नान्यस्य अभावे पिप्पलस्य तु ।
शोणितं दृश्यते यस्य हनुस्तालु च शीर्य्यते ॥
गात्रञ्च कम्पते यस्य तमशुद्धं विनिर्द्दिशेत् ॥"

स्नानोदकेन देवतास्नानोदकेन । तथा च कात्यायनः ।

"देवतास्नानपानीयक्लिन्नतण्डुलभक्षणे ।
शुद्धनिष्ठीवनात् शुद्धो नियम्योऽशुचिरन्यथा ॥"

शिरोरोपितपत्रकं तण्डुलान् भक्षयित्वा निष्ठीवयेत् प्राड्विवाकः इति । निष्ठीवयेदिति णयन्तात् सिद्धम् । तुलानिरूपितं सर्व्वदिव्यसाधारणञ्च धर्म्मावाहनादिहवनान्तं पूर्ब्बवदिहापि कर्त्तव्यम् ॥ शिरोरोपितपत्रलेख्यमन्त्रादि यथा,—

"तत्त्वार्थमभियुक्तस्य लेखयित्वा तु पत्रके ।
मन्त्रेणानेन सहितं कुर्य्यात्तस्य शिरोगतम् ॥
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मो हि जानाति नरस्य वृत्तम् ॥"

इति दिव्यतत्त्वम् ॥

तण्डुला, स्त्री, (तण्ड्यते आहन्यते इति । तण्ड + उलच् ततष्टाप् ।) महासमङ्गा । विड़ङ्गम् । इति राजनिर्घण्टः ॥

तण्डुलाम्बु, क्ली, (तण्डुलस्य अम्बु ।) तण्डुलोदकम् । चेलुनि इति भाषा । तत्पर्य्यायः । ज्येष्ठाम्बु २ । इति वैद्यकपरिभाषा ॥ तण्डुलोत्थम् ३ । इति राजनिर्घण्टः ॥ यथा, वैद्यकचक्रपाणिसंग्रहे ग्रहण्यधिकारे ।

"पिवेत् समांशं तच्चूर्णं सक्षौद्रं तण्डुलाम्बुना ॥"

तण्डुली, स्त्री, (तण्डुल + ङीष् ।) यवतिक्ता लता । शशाण्डुलीककर्कटी । तण्डुलीयशाकः । इति राजनिर्घण्टः ॥ (विवृतिरस्यास्तण्डुलीय-शब्दे ज्ञातव्या ॥)

तण्डुलीकः, पुं, (तण्डुलीव कायतीति । कै + कः ।) तण्डुलीयशाकः । इति शब्दरत्नावली ॥

तण्डुलीयः, पुं, (तण्डुलाय हितः । तण्डुल + "विभाषा हविरपूपादिभ्यः ।" ५ । १ । ४ । इति छः ।) पत्रशाकविशेषः । खुदियानटिया इति चाँपानटिया इति च वङ्गभाषा । चवराइ इति अल्पमरषा इति च हिन्दी भाषा । तत्-पर्य्यायः । अल्पमारिषः २ । इत्यमरः । २ । ४ । १३६ ॥ तण्डुलीकः ३ तण्डुलः ४ । इति शब्द-रत्नावली ॥ भण्डीरः ५ तण्डुली ६ तण्डुलीयकः ७ ग्रन्थिलः ८ बहुवीर्य्यः ९ मेघनादः १० घन-स्वनः ११ सुशाकः १२ पथ्यशाकः १३ स्थूलेषुः १४ स्वनिताह्वयः १५ वीरः १६ तण्डुलनामा १७ । अस्य गुणाः । शिशिरत्वम् । मधुरत्वम् । विष-पित्तदाहभ्रमनाशित्वम् । रुचिकारित्वम् । दीप-नत्वम् । पथ्यत्वञ्च । तद्दलगुणाः । हिमत्वम् । अर्शःपित्तरक्तविषकासविनाशित्वम् । ग्राहक-त्वम् । मधुरत्वम् । विपाके दाहशोषशमनत्वम् । रुचिदातृत्वञ्च । इति राजनिर्घण्टः ॥ विड़-ङ्गम् । ताप्यम् । इति मेदिनी । ये, ११९ ॥ अस्य पर्य्यायगुणाः ।

"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ।
भण्डीरस्तण्डुलीवीजो विषघ्नश्चाल्पमारिषः ॥
तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित् ।
सृष्टमूत्रमलो रुच्यो दीपनो विषहारकः ॥"

तद्भेदः । जलतण्डुलीयं शाकं कञ्चटमिति प्रसिद्धम् ।

"पानीयतण्डुलीयन्तु कञ्चटं समुदाहृतम् ।
कञ्चटं तिक्तकं रक्तपित्तानिलहरं लघु ॥"

इति भावप्रकाशः ॥

तण्डुलीयकः, पुं, (तण्डुलीय + स्वार्थे कन् ।) तण्डु-लीयशाकः । (यथा, हारीते १ स्थाने १० अः ।
"स्वादुः पाके लघुकपित्तविषघ्नस्तण्डुलीयकः ।
हन्ति वातं विड़्विबन्धं मूत्रवातकफे हितः ॥")
विड़ङ्गम् । इति राजनिर्घण्टः ॥

तण्डुलीयिका, स्त्री, (तण्डुलीय + स्वार्थे कन् स्त्रियां टाप् । कापि अत इत्वञ्च ।) विड़ङ्गम् । इति राजनिर्घण्टः ॥

तण्डुलुः, स्त्री, (तण्डुल + पृषोदरात् उत्वे साधुः ।) विड़ङ्गम् । इति शब्दरत्नावली ॥